National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2019; 1(23): 66-67
© 2019 NJHSR
www.sanskritarticle.com

**दीपेन्द्र जोशी**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

**Correspondence:**
**दीपेन्द्र जोशी**
शोधच्छात्रः,साहित्यविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः

# ईश्वरविलासमहाकाव्ये भक्तिनिरूपणम्

**दीपेन्द्र जोशी**

साहित्यपदेन काव्यं काव्यशास्त्रमपेक्षितम्। तत्रकाव्यं ललितोचितशब्दार्थसन्निवेशचारु लोकनत्तरवर्णनानिपुणकविकर्म सहृदयमनः प्रीतिकारि नियतिकृतनियमरहितं ह्लादैकमय - मनन्यपरतन्त्रं कविप्रतिभैकविलसितं नवरसरुचिरमिति सहृदयसमीक्षकैः काव्यशास्त्रे, निर्रितंतथा प्रमातृभिः सामाजिकौर्भावुकैरास्वाद्यते। तत्प्रतिपादकं शास्त्रं काव्यशास्त्रं। एवं तद्विद्वदाह्लादकारिणि वक्रकविव्यापारशालिनि बन्धे व्यवस्थितो सहितां शब्दार्था काव्यम्। सहितयोः शब्दारथयोर्भावः साहित्यम्। काव्यशास्त्रश्च साहित्यशास्त्रनाम्ना प्रथितम्।

कीर्तपरमाह्लादगुरगराजदेवताप्रसादादिप्रयोजकसुकुमारक्रमोदितधर्मासाधनपाय - सहृदयह्लादकरक-काव्यबन्धस्य रसास्वादनं मुख्यं प्रयोजनम्। स रस एव शब्दार्थशरीर - काव्यस्यात्मा, रसश्चास्वादनरूपो लोकोत्तरचमत्कारैकप्राणः कैश्चित्प्रमातृभिरा स्वाद्यो, विभावनुभावव्यभिचारिसंयोगादभिव्यक्तः सचेतसां स्थायिभावो रसः "पुण्यवन्तः प्रभिन्वन्ति योगिवद्रससंततिम्" इत्युक्त्या ब्रह्मास्वादसहदरस्तथा भग्नावरणचिद्विशिष्टो रत्यादिः स्थायिभावो रस इति। वस्तुतस्तु "रसो वै सः, रसै ब्यवायं लब्ध्वाऽनन्दी भवती" इति श्रुतिस्वारस्येन रत्याद्यवच्छिन्ना ग्रावरणा चिद्रेव रस इति रसगङ्गाधरकारनिष्कर्षः। सोऽर्थ रसः सहृदयैकस्वाद्यः(सहृदयः पुण्यैर्नरो जायते)।

अष्टौ नाट्ये रसाः स्मृता इत्युपक्रम्य निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रस इति मम्मटः, स्फुटं चमत्कारितया वात्सल्यञ्च रयं विदुः इति विश्वनाथः। तथा पण्दितराजः - अथ कथमेव एव रसाः, भक्तिरसस्य दुरपह्लवत्वादिति पक्षमुद्भाव्य पुनः सिद्धान्ततया स्वमतं युयोज– भक्तेर्देवादिविषयरतित्वेन भावान्तर्गततया रसत्वानुपपत्तेः। भरतादिमुनिवचना - नामेवान्न रसभावत्वादिव्यवस्थापकत्वेन स्वातन्त्र्यायोगात् रसैनां नवत्वगणना च मुनिवचनानियन्त्रिता भज्येत, इति तथैवाभिनवभारतकारःआद्रतास्थाविकः स्नेहो रस इति त्वसर्। स्नेहो ह्यमिषञ्गः, स च सर्वो रत्युत्साहादावेव पर्यवस्यति। एवं भक्तावपि वाच्यमिति। एवमेते रसा ज्ञेया नवलक्षणलक्षिता इति।

साहित्यशास्त्रे रससिद्धान्तप्रतिपादकेषु मूर्धन्यग्रन्थेषु सर्वत्र नवरसानां मध्ये शृङ्गार एव रसराजत्वेन प्रतिपादितः। भरतमुनेर्नाट्यशास्त्रादारभ्य पण्डिराजजगन्नाथस्य रसगङ्गाधर - पर्यन्तं प्रायोऽयोमेव सेद्धान्तो दृश्यते। कुत्रापि भक्तिरसस्य पृथग्रूपेण चर्चा न समायाता। पञ्चदशख्रीस्ताब्दमधअये वैष्णवधर्माचार्यश्रीमद्रुपगोस्वामिपादाः महान्तः सन्तः अलङ्कार - शास्त्रस्यापि चुडान्ताः विद्वांसः सञ्जाताः। तेषैं भक्तिरसामृत सिन्धुः उज्ज्वल -नीलमणिश्च द्वौ मुर्धन्यग्रन्थौ विद्येते यौ हि रसवादप्रतिपादकसिद्धान्तेषु सर्वथा नवीनं पन्थानं प्रतिपादितवन्तौ।

तत्र भगवाता गोस्वामिना रूपगोस्वमिना मधुराख्यो भक्तिरसो मुख्यरसो मुख्यत्वेन प्रतिपादितः। भक्तिरस एवाङ्गीभूतस्तदङ्गत्वेनैवान्ये सर्वेऽपि रसाः वर्तन्ते भक्तिरस धुर्यामेव सर्वे रसाः चक्रवत् परिभ्रमन्ति इति एव सिद्धान्तप्रतिपादने रूपगोस्वामिनो नवनोलक्षणं विधायोदाहरणप्रत्युदाहरणरूपेण शतशो दृष्टवान् प्रदर्शितवन्तः।

मधुराख्योऽयंरसः सर्वथा गोपनीयोऽति रहस्यश्च। प्रमुखरसेषु उज्ज्वलत्वापरपर्यायो भक्तिरसः प्रदश्रितो भक्तिरसामृतसिन्धौ, किन्तु स चोज्ज्वलाख्यो रसः लौकिकत्वेन प्रतिभाति। भागवतेष्वपि केचन एवास्य मधुराख्य-रसस्यास्वादनं कर्तुं शक्नुवन्ति यतो हि मधुरसस्य तात्पर्यालोचनानुभवाभिव्यक्ति प्रभितिषु महती कठिनता दुरूहता च चरमभक्तिसीम्नि। एवास्वाद्यतां मधुराररतिः नीता भक्तिरसः प्रोक्तो मधुराख्यो मनीषिभिः-इति प्रदर्शितरीत्या, विभावानुभावसात्विकसञ्चा- रिभिः कारणकार्यसहकारिभिः एवास्वाद्यतां नीता ,ती मधुरा रतिरेव स्थायिभावः। तेनैव स्थायिभावेनास्य भक्तिरसस्याभिर्वक्तेरेजाते तेषामेव भकेतिभावेनोतप्रोतहृदयः सहृदयतां गतः।

स च -भगवदालम्बस्तत्कथालीलाश्रवणदर्शनोद्ग्रीपनो रोमाञ्चाश्रुपातानुभावो हर्षादिसञ्चारिपरिपुष्टो भागवतादिपु-राणश्र वणपठनसमये भगवद्भक्तैरास्वाद्यमाने भक्तिरसः। भगवादनुरागरूपा भक्तिश्चात्र स्थायिभाव इति पण्डुतराजः। यथाऽत्र भक्तिरेव स्थायिभावो रसोऽपि, तथैव भक्तिदर्शने प्रतिपादितम् – केनाचित्साधनेनतद्भिन्नं साध्यं साध्यते किन्तु भक्तेस्तदेव वैशिष्टं यदत्र भक्तिरूपरसावनेन भक्तिरेव साध्यं गम्यते। अर्थात् भक्तिः साधन शाध्यश्च। वैधीभक्त् रागात्मिका तथा च पर भक्तिः साध्यते तथा चोक्तं भागवते –

**श्रेयाभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते।।**
**दानव्रततपोहोमजपस्वाध्यायसंयमैः।**

**लक्षणप्रकाराभ्यां वस्तुनिर्देशस्तथा प्रथमं भक्तिप्रकारः –**

भक्तिस्तावद् द्रविदा गौणी-पराप्रभेदात्। गौणी पुनर्द्विविधा वैधी रागात्मिका च। वैधी चापि पुनः श्रवणादिभेदेन नवधा। रागात्मिका च हास्यादिरसभेदेन चतुर्दशधा विभज्यते। ते, च वैधी-रागात्मिका तदनन्तरं च परा भक्तिर्जायते। साधनदशायां गौणी एव सिद्धावस्थायां परा निगद्यते। अतः परा या भक्तेः प्राप्यते या साधनावस्था सैव गौणी प्रोच्यते।

अथ भक्तिलक्षणम् –

**अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।**
**आनुकूले कृष्णानुशील, भक्तिरुत्तमा।।**

प्रेमा भक्तिः –

**सम्यङ्मसृणितस्वान्तो ममत्वातिशयाङ्कितः।**
**भावः स एव सान्द्रात्मा बुदैः प्रेमा निगद्यते।।**

तथा प्रमोदये क्रमः –

**आदौशुद्धा ततः साधुसङ्गोऽथ भजनक्रिया।**
**ततोऽनर्थनिर्वृत्तिः, स्याततो निष्ठा रुचिस्ततः।।**
**अथासक्तिस्ततो भावस्ततः प्रेमाऽभ्युदञ्चति।**
**साधकानामयं प्रेम्णः प्रादुर्भावे भवेत्क्रमः।।**

भक्तिमार्गे साधकः - काव्यमार्गे भावुकः सहृदयः।

अत्र कियत्काव्यत्वं कियच्चास्वाद्यत्वमिति काव्यसमीक्षकैः सहृदयैश्च कस्मिन् काव्यात्मननि रसे स्यादस्यान्तर्भाव इति स्वयं विभावनीयमिति। एवमादिप्रसङ्गैः ईश्वरविलासकाव्य-मोतप्रोतमस्ति।

**ईश्वरविलासमहाकाव्यम् –** कविकलानिधि - श्रीकृष्णभट्टे प्रणीतमिदं चतुर्दशसर्गात्मं महाकाव्य़म्ति। अष्टापञ्चाशतदुत्त-रैकोन विंशतिशततमे ईस्वीयाब्दे जयपुरस्थ राजस्थान पुरातत्वाम्वेषणमन्दिरात् प्रकाशितम्। ग्रन्थस्यैतस्य सम्पादनभारो भट्टमधुरानाथशास्त्रिमा स्यरुपेण निर्व्यूढः।

ईश्वरविलासमहाकाव्ये कल्पनायां रमणीयतासरसता, मौलिकता च सन्ति। अत्राङ्गी रसो वीरः अन्येषां भक्तिः अङ्गत्वेन परिपाको जातः। अत्र शैल्यां प्राञ्जलता अस्ति। अत्र भावकलापक्षयोः सामञ्जस्यं संलक्ष्यते। भावानां गाम्भीर्यं रसनां परिपाको भाषायाः रमणीयता-सरसताष अलङ्काराणां स्वाभाविकतायाः समावेशोऽस्ति।

**विद्युद्वल्लिसमान-मञ्जुमहसा-पीताम्बरोद्योतिनीं**
**लावण्यैकललामधाम-ललनां कांचिद्दधानं भजे।**
**ह्येलम्भि ब्रजयोषितां भवभयाऽऽभीलं सलीलं हरन्नीलं**
**प्रावृषिजसारिजलद श्री लंधिशीलं महः।।**

सुर्यवंशस्य विख्यातनामकछवाहावंशज पृथ्वीराजमहाराजो मूलपुरुषः इति मत्वा च अस्य वर्णनेन सर्गस्यास्य प्रारम्भः क्रियते तत्र पृथवीराजः विष्णुभक्तरूपेण वर्णितो दृश्यते-

**भास्वद्वंश-वतंसतां दधाति ये धर्मात्मनां धीमतां**
**धौरेयाः धरणीतले सुविदिता मान्धातृमुख्या नृपा।**
**तस्मिन्नेव कुलेऽमले विधुरिष श्रीराम्बुधिः पार्थिवः**
**पृथ्वीरजज इति प्रसिद्ध उदभूद्यो विष्णुभक्ताग्रणीः।**